## लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने । (३९/२५९१)

ली ला इत्येतयोरङ्गयोः अन्यतरस्यां नुक् लुक् इत्येतावागमौ भवतो णौ परतः स्नेहविपातनेऽर्थे । घृतं विलीनयति, घृतं विलाययति । [1]विलालयति, [2]विलापयति । ली ई इति ईकारः प्रश्लिष्यते, ततः ईकारान्तस्यैव नुक् भवति, न तु कृतात्वस्य 'विभाषा लीयतेः' (६.१.५१/२५०९) इति । स्नेहविपातने इति किम् ? जतु विलापयति । जटाभिरालापयते । ली इति लीलीङोर्ग्रहणम् । ला इति लातेः[3], कृतात्वस्य च लीयतेः ॥

## भियो हेतुभये षुक् । (४०/२५९६)

भी इत्येतस्य [4]हेतुभयेऽर्थे षुगागमो भवति णौ परतः । मुण्डो भीषयते । जटिलो भीषयते । अत्रापि भी ई इति [5]ईकारप्रश्लेषः कृतात्वस्य[6] पुग्निवृत्त्यर्थः[7] । मुण्डो [8]भापयते इत्येवं[9] हि तत्र भवति । हेतुभये इति किम् ? कुञ्चिकया एनं भाययति[10] । नात्र हेतुः प्रयोजको [11]भयकारणम्, किं तर्हि, कुञ्चिका ॥

## स्फायो वः । (४१/२५९७)

[12]स्फाय् इत्येतस्य अङ्गस्य [13]वकारादेशो भवति णौ परतः । [14]स्फावयति ॥

## शदेरगतौ तः । (४२/२५९८)

शदेः अङ्गस्य अगतौ अर्थे [15]वर्तमानस्य [16]तकारादेशो भवति णौ परतः । पुष्पाणि [17]शातयति । अगतौ इति किम् ? गाः[18] शादयति [19]गोपालकः ॥

## रुहः पोऽन्यतरस्याम् । (४३/२५९९)

[20]रुहेः अङ्गस्य अन्यतरस्यां पकारादेशो भवति णौ परतः । [21]व्रीहीन् रोपयति, [22]व्रीहीन् रोहयति ॥

## प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः । (४४/४६३)

प्रत्ययस्थात् [23]ककारात् पूर्वस्य [24]अकारस्य इकारादेशो भवति आपि परतः, स चेद् आप् सुपः परो न भवति । जटिलिका । मुण्डिका । कारिका । हारिका । [25]एतिकाश्चरन्ति । प्रत्ययग्रहणं किम् ?

---

1. विषं विलालयति क. 2. उदाहरणमिदं नास्ति क. 3. च इत्यधिकम् इ. 4. अङ्गस्य इत्यधिकम् ह. क. ड. 5. इकारप्रश्लेषः ब. 6. च इत्यधिकम् ब. 7. द्रष्टव्यः इत्यधिकम् ब. 8. भाययते ड. 9. पुग् इत्यधिकम् क. 10. शरैः भीरुम् अभाययत इत्यधिकम् इ. 11. भयस्य कारणम् क. 12. स्फायी क. 13. वकारोऽन्तादेशः इ. 14. स्फावयतः स्फावयन्ति इत्यधिकम् ह. 15. वर्तमानस्य नास्ति क. 16. तकारोऽन्तादेशः ह. 17. फलानि इत्यधिकम् ब. क. इ. 18. दण्डेन इत्यधिकम् क, यष्टचा इत्यधिकम् ह. 19. गोपालः ड. ब. 20. रुह इत्येतस्य क. इ. ह. 21-22. व्रीहीन् नास्ति क. 23. कात् इ. ह. 24. अतः ह. 25. एतीकाः क, एनिकाः इ.